**चन्द्रोद्भासितशेखरे स्मरहरे गङ्गाधरे शङ्करे**

**सर्पैर्भूषितकण्ठकर्णविवरे नेत्रोत्थवैश्वानरे ।**

**दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे**

**मोक्षार्थं कुरु चित्तवृत्तिमखिलामन्यैस्तु किं कर्मभिः ॥**

(श्रीमच्छङ्कराचार्यविरचितं श्रीशिवापराधक्षमापनस्तोत्रम्, ११)

पदच्छेदः – चन्द्र-उद्भासित-शेखरे स्मरहरे गङ्गाधरे शङ्करे सर्पैः भूषित-कण्ठ-कर्ण-विवरे नेत्रोत्थ-वैश्वानरे । दन्ति-त्वक् कृत-सुन्दर-अम्बर-धरे त्रैलोक्य-सारे हरे, मोक्षार्थं कुरु चित्तवृत्तिम् अखिलाम् अन्यैः तु किम् कर्मभिः ॥

अन्वयः – चन्द्रोद्भासितशेखरे स्मरहरे गङ्गाधरे शङ्करे सर्पैर्भूषितकण्ठकर्णविवरे नेत्रोत्थवैश्वानरे । दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे मोक्षार्थम् अखिलां चित्तवृत्तिं कुरु । अन्यैः कर्मभिः तु किम्।

व्याख्या – चन्द्रोद्भासितशेखरे – चन्द्रः उद्भासितः नाम उत्कर्षरूपेण भासितः प्रकाशितः वा शेखरे नाम मस्तके मूर्ध्नि चूडायां वा यस्य सः, चन्द्रोद्भासितशेखरः, तस्मिन् । अर्थात् यस्य मस्तके यस्य मूर्ध्नि शिरसि वा चन्द्रः उद्भासते शोभते प्रकाशते वा स चन्दोद्भासितशेखरः, तस्मिन् अर्थात् शिवे महादेवे महेश्वरे वा ॥ शिवस्य मूर्ध्नि मस्तके वा चन्द्रः शोभते । अतः स चन्द्रशेखरः, चन्द्रोद्भासितशेखरः, चन्द्रमौली इत्यादिभिः नामभिः पूज्यते ज्ञायते च ।

स्मरहरे – स्मरस्य हरः स्मरहरः, तस्मिन् । स्मरः नाम कामः कामदेवः कन्दर्पो वा । तस्य हरः हर्ता नाशकः वा । तस्मिन् अर्थात् शिवे । शिवः कामदेवस्य विनाशं कृतवान् इति कुमारसम्भवे महाकाव्ये वर्णितमस्ति । अतः स स्मरहरः भवति ।

गङ्गाधरे – गङ्गायाः धरः गङ्गाधरः, तस्मिन् । अथवा धरति इति धरः । गङ्गां धरति इति गङ्गाधरः नाम शिवः । शिवः स्वस्य मूर्ध्नि शिरसि वा गङ्गां धरति । तस्य शिवस्य शिरसि गङ्गा शोभते । अतः स गङ्गाधरः इत्यभिधीयते । तस्मिन् गङ्गाधरे शिवे वा ।

शङ्करे – शं करोति इति शङ्करः । शं नाम मङ्गलं शुभं कल्याणं वा । यः देवः जनानां भक्तानां वा शुभं करोति मङ्गलं करोति कल्याणं वा करोति स शङ्करः इति कथ्यते । तस्मिन् शङ्करे नाम शिवे ।

सर्पैः भूषितकण्ठकर्णविवरे – सर्पैः भूषितः कण्ठः कर्णयोः विवरे च सर्पैः भूषितकण्ठकर्णविवरः, तस्मिन् सर्पैः भूषितकण्ठकर्णविवरे । यस्य कण्ठे कर्णयोः विवरयोः समीपे च सर्पः भूषितः शोभितः अलङ्कृतः मण्डितः वा । तस्मिन् देवे अर्थात् शिवे ।

नेत्रोत्थवैश्वानरे – नेत्रात् नेत्रयोः वा उत्थितः नेत्रोत्थितः । नेत्रोत्थितः वैश्वानरः, तस्मिन् । नेत्रोत्थवैश्वानरे । अर्थात् यस्य नेत्रात् नयनात्, नेत्रयोः नयनयोः वा वैश्वानरः नाम अग्निः अनलः पावकः वा उत्थितः निर्गतः सः । तस्मिन् । महादेवस्य शिवस्य तृतीयनेत्रात् अग्निः निर्गतः । तेनाग्निना स कामदेवं भस्मीकृतवान् इति प्रसिद्धिः सर्वजनविदिता । कुमारसम्भवे महाकाव्ये एतस्य वर्णनं दृश्यते । अतः नेत्रोत्थवैश्वानरे नाम तस्मिन्शिवे परमेश्वरे वा ।

दन्तित्वक्कृतसुन्दराम्बरधरे – दन्तिन् नाम हस्तिन् करिन् गजः वा तस्य त्वक् अर्थात् चर्मन् । तेन कृतं सुन्दरम् अम्बरं नाम वस्त्रम् । तद् धरति इति धरः । दन्तिनः हस्तिनः त्वचा चर्मणा कृतं निर्मितं सुन्दरं रमणीयम् अम्बरं वस्त्रं येन, सः दन्तित्वक्कृतसुन्दराम्बरः । तद् अम्बरं धरति यः स दन्तित्वक्कृतसुन्दराम्बरधरः । तस्मिन् । अर्थात् तादृशे शिवे महेश्वरे महादेवे वा ।

त्रैलोक्यसारे – त्रयाणां लोकानां समाहारः इति त्रैलोक्यम् । तस्य त्रैलोक्यस्य सारः अर्थात् मुख्यः प्रधानः वा । तस्मिन् । त्रैलोक्यसारे । शिवः महादेवः सदाशिवः त्रयाणां लोकानां सारभूतः मुख्यभूतः वा भवति । तं विना एतेषां त्रयाणां लोकानां सृष्टिः स्थितिः च न सम्भवतः । ततः स त्रैलोक्यस्यास्य सारभूतः भवति ।

हरे – हरतीति हरः । भक्तानां जनानां दुःखानि हरति इति हरः । शिवः । तस्मिन् । हरे शिवे । मोक्षार्थं मुक्त्यर्थं आत्मनः मुक्तिनिमित्तम् अखिलां अर्थात् निखिलां पूर्णां चित्तवृत्तिं कुरु अर्थात् सम्पूर्णं चित्तं सम्पूर्णं मनः एतस्मिन् एतादृशे परमेश्वरे महादेवे शिवे नियोजय स्थापय धारय दृढीकुरु इत्यर्थः । अन्यैः कर्मभिः तु किम् ? अर्थात् अन्यैः सांसारिककर्मभिः किं भवति ? अर्थात् अन्यैः कर्मभिः किमपि न भविष्यति । अन्यैः कर्मभिः आत्मनः मुक्तिर्न भविष्यति । केवलं उपरिवर्णिते एतादृशे परमेश्वरे महदेवे शिवे सम्पूर्णरूपेण मनःनियोजनेन सम्पूर्णभक्त्या च दृढभक्त्या च अचलनिष्ठया च मुक्तिः सम्भविष्यति । अन्यथा न । अतः अन्यानि सर्वाणि कर्माणि परित्यज्य तस्मिन् परमेश्वरे शिवे अचलां भक्तिं कुरु । तेन मोक्षं प्राप्तुमर्हसि ।

सुभाषितमिदं शार्दूलविक्रीडितम् नाम छन्दसा विरचितमस्ति । एतस्य छन्दसः लक्षणं पूर्वस्मिन् सुभाषिते द्रष्टव्यम् ।